ष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य
भ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चंद्रमा नाभिर्निरभिद्यत नाभ्या अप

ऐ॰
॥२०॥

नोपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥१॥ ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे
प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदा
मेति ताभ्यो गामानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्योश्वमानयत्ता अब्रुवन्न वै नोयमलमिति ताभ्यः
पुरुषमानयत्ता अब्रुवन्सुकृतं बतेति पुरुषो वाव सुकृतं ता अब्रवीद्यथायतनं प्रविशतेत्यग्निर्वाग्भू
त्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्दिशः श्रो
त्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चंद्रमा मनो भूत्वा हृदयं प्राविश
न्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशंस्तमशनापिपासे अब्रूतामावाभ्या
मभिप्रजानीहीति ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै कस्यै च दे
वतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥२॥ स ईक्षतेमे नु लोकाश्च लोकपालाश्चा
न्नमेभ्यः सृजा इति सोपोभ्यतपत्ताभ्योभितप्ताभ्यो मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत्तदेन तत्
सृष्टं पराङ्त्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्न
मत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं स यद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्य

क्तिमिति बृहती संपद्यमानानव स्वर्वर्त

व्यक्तं तस्य रामिति सत्यं वै वाक् च ... इति तद्यदेवैतद्बृहती सहस्रमनुष्टुप्संपन्नं भव
ति तस्मात्तदेवं प्राणा बृहत्येवा वाचमनुष्टुभं तन्वै सच्छिन्निमिमीते स वा एष वाचः परमो विकारो यदेतन्महदुक्थं
तदेतत्पंचविधं मितममितं स्वरः सत्यानृते ऋग्गाथा कुंब्या तन्मितं यजुर्निगदो वृथा वाक्तदमितं सामा
थो यः कश्च गेष्णः स स्वर ओमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं स हेश्वरो यशस्वी कल्या
णकीर्तिर्भवितोः पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति
स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद्दयेत त्वेनेन
पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोंकुर्याद्रिंच्या
दात्मानं स कामेभ्यो नालं स्यादथैतत्पूर्णमभ्यात्मं यन्नेति स यत्सर्वं नेति ब्रूयात्पापिकास्य कीर्तिर्जायेत
सैनं तत्रैव हन्यात्तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोति तयोर्मिथुनात्प्रजाय
ते भूयान्भवति यो वै तां वाचं वेद यस्या एष विकारः स संप्रतिविदकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमा
ना बह्वी नानारूपा भवति तस्यै यदुपांशु स प्राणोथ यदुच्चैस्तच्छरीरं तस्मात्तिर इव तिर इव ह्यशरीरमशरी
रो हि प्राणोथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरं ॥६॥ तदाहुर्बृहती सहस्रसंपन्नं तस्य यशः सद्रूपमभ

ऐ० अ०२ म्दंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि
॥२३॥ देवाः॥२३॥ ॥इति द्वितीयोपनिषत्सु चतुर्थोध्यायः॥ ॥अपक्रामंतु गर्भिण्यः॥ पुरुषे ह वा अय
मादितो गर्भो भवति यदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजः संभूतमात्मन्येवात्मानं बिभर्ति तद्यदा
स्त्रियां सिंचत्यथैनज्जनयति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमंगं तथा
तस्मादेनान्न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति सा भावयित्री भावयितव्या भवति तं
स्त्री गर्भं बिभर्ति सोग्र एव कुमारं जन्मनोग्रेधिभावयति स यत्कुमारं जन्मनोग्रेधिभावयत्या
त्मानमेव तद्भावयत्येषां लोकानां संतत्या एवं संतता हीमे लोकास्तदस्य द्वितीयं जन्म सोस्या
यमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते थास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इ
तः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म तदुक्तमृषिणा गर्भे नु सन्नन्वेषामवेदमहं देवानां २
जनिमानि विश्वा॥ शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो
एव वामदेव एवमुवाच स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे सर्वान्कामानाप्त्वामृतः समभव

त्समभवत्॥२४॥ इत्युपनिषत्सु पंचमोध्यायः॥ ॥यथास्थानं तु गर्भिण्यः॥ कोयमात्मेति वयमुपास्म
हे कतरः स आत्मा येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति ये
न वा स्वादु चास्वादु च विजानाति यदेतद्धृदयं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृ
तिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधे
यानि भवंत्येष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इमानि च पंच महाभूतानि पृथिवी वायुराकाश
आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चांडजानि च जारुजानि
च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थाव
रं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म स एतेन प्रज्ञेनात्मना
स्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः समभवत्समभवत्॥२५॥ इत्युप
निषत्सु षष्ठोध्यायः॥ ॥वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविराविर्म एधि वेदस्य
म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि त

आ० मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारं ॥२६॥ इति द्वितीयारण्यके सप्तमोऽध्यायः ॥ अथा
॥२२॥ तः संहिताया उपनिषत् पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेय आकाशः संहितेत्यस्य माक्ष
व्यो वेदयांचक्रे स हापि परिल्हतो मेने न मेऽस्य पुत्रेण समगादिति समाने वैतत्परिहृतो मेनेऽदृत्या गस्त्वः
समानं त्वेतद्भवति वायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपं प्राणः संहिते
ति शूरवीरो माण्डूकेयोऽथ हास्य पुत्र आह ज्येष्ठो मनः पूर्वरूपं वागुत्तररूपं मनसा वा अग्रे संकल्पयत्यथ
वाचा व्याहरति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं प्राणस्त्वेव संहितेति समानमेनयो रत्र पितुश्च पु
त्रस्य च स एषोऽश्वरथः प्रष्टिवाहनो मनोवाक्प्राणसंहितः स य एवमेतां संहितां वेद संधीयते प्रजया पशु प
भिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति नु माण्डूकेयानां ॥१॥ अथ शाकल्यस्य पृथि
वी पूर्वरूपं द्यौरुत्तररूपं वृष्टिः संधिः पर्जन्यः संधाता तदुतापि यत्रैतद्बलवदनु वृष्ट्वा सन्दधदहोरात्रे
वर्षति द्यावापृथिव्यौ समधातामित्येवतद्याहुरितीत्यधिदैवतमथाध्यात्मं पुरुषो ह वा अयं सर्व २
आंदं द्विदलेख वतद्याहुरतस्येदमेव पृथिव्या रूपमिदं दिवस्तत्रापमंतरेणाकाशो यथा सो द्या

त्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रहीतुं स यद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजि
घृक्षत्तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुं स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्त
न्नाशक्नोत्त्वचा ग्रहीतुं स यद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वा हैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्म
नसा ग्रहीतुं स यद्धैनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्ने
न ग्रहीतुं स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषो
ऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः स ईक्षत कथं न्विदं मदृते स्यादिति स ईक्षत कतरेण प्र
पद्या इति स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रे
ण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ को
ऽहमिति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनं तस्य त्रय
आवसथास्त्रयः स्वप्ना अयमावसथोऽयमावसथोऽयमावसथ इति स जातो भूतान्यभिव्यैख्यत्
किमिहान्यं वावदिषदिति स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती ३ तस्मादिदन्द्रो ना

२३ पादथयद्येनमुप्रयमंतरेणब्रुवंतंपरउपवदेदंतरिक्षंदेवतामारीतरिक्षंत्वादेवतारिष्यतीत्येनंब्रूयाद्य
थातुकथाचब्रुवन्वाब्रुवंतंवाब्रूयादृष्याश्रामेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादति
घुन्मएवब्राह्मणंब्रूयान्नातिघुम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहह्रस्वी
रोमांडूकेयः ॥३॥ अथातोनुव्याहाराःप्राणोवंशइतिविद्यात्सयएनंप्राणंवंशमुपवदेदकुर्वं
चेन्मन्येतप्राणंवंशंसमधाँप्राणंमावंशंसंदधंतंनशाक्रोषीत्याहप्राणस्त्वावंशोहास्यतीत्येनंब्रू
यादथचेदशाकुर्वंतंमन्येतप्राणंवंशंसमधित्सिषंतंनाशकःसंधातुंप्राणस्त्वावंशोहास्यतीत्येनं
ब्रूयाद्यथातुकथाचब्रुवन्वाब्रुवंतंवाब्रूयादृष्याश्रामेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणं
ब्रूयादतिघुम्नएवब्राह्मणंब्रूयान्नातिघुम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्मा
हह्रस्वीरोमांडूकेयः ॥४॥ अथखल्वाहुर्निर्भुजवक्त्राःपूर्वमक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोव
काशःपूर्वरूपोत्तररूपेअंतरेणसासंहितेतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्य
शसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथयंब्रूमोनिर्भुजवक्त्राइतिहस्माहह्रस्वोमांडू

कयःपूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपेअंतरेणयेनसंधिंविवर्तय
तियेनस्वरास्वरंविजानातियेनमात्रामात्रांविभजतेसासंहितेतिसयएवमेतांसंहितांवेदसंधी
यतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथहास्मपुत्रआहमध्य
मःप्रातीबोधीपुत्रोक्षरेखल्विमेअविकर्षन्तनेकीकुर्वन्यथावर्णमाहतद्यासोमात्रापूर्वरू
पोत्तररूपेअंतरेणसंधिंविज्ञापनीसामतद्भवतिसामैवाहंसंहितांमन्यइतितदप्येतदृषिणो
क्तंबृहस्पतेनपरःसाम्नोविदुरितिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्र
ह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥५॥ बृहद्रथंतरयोरूपेणसंहितासंधीयतइतिताक्ष्यो
वाग्वैरथंतरस्यरूपंप्राणोबृहतउभाभ्यामुखलुसंहितासंधीयतेवाचाचप्राणेनचैतस्यांहस्मो
पनिषदिसंवत्सरंगारक्षयतेताक्ष्र्यएतस्यांहस्ममात्रायांसंवत्सरंगारक्षयतेताक्ष्र्यस्तदप्येतदृषि
५५ णोक्तंरथंतरमाजभाराबसिष्ठः॥भरद्वाजोबृहदाचक्रेअग्नेरितिसयएवमेतांसंहितांवेदसंधी
यतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतिवाक्प्राणेनसंहितेतिकौ

अ०
२[illegible]

उरव्यः प्राणः पवमानेन पवमानो विश्वैर्देवैर्विश्वे देवाः स्वर्गेण लोकेन स्वर्गो लोको ब्रह्मणा सैषावरपरा
संहिता स य एतामेवमवरपरां संहितां वेदैवं हैव स प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन
संधीयते यथैषा संहिता स यदि पूर्णवोपसृतः स्वेन वार्थेनाभिव्याहरेदभिव्याहरन्नेव विद्यादि
वं संहितागमदिति दूषन्देवानामेवं वक्षिष्यतीति रोश्वत्तथा स्यात्स य एवमेतां संहितां वेद संधीयते
प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति वाक्संहितेति पंचालचंडो वाचा वै वे
दाः संधीयंते वाचा छंदांसि वाचा मित्राणि संदधति वाचा सर्वाणि भूतान्यथो वागेवेदं सर्वमिति त
द्यत्रैतदधीते वा भाषते वा वाचि तदा प्राणो भवति वाक्तदा प्राणं रेढ्यथ यत्र तूष्णीं वा भवति स्वपिति
वा प्राणे तदा वाग्भवति प्राणस्तदा वाचं रेढि तावन्योन्यं रीढो वागेव माता प्राणः पुत्रस्तदेषाभ्यनूक्ता
एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे। तं पाकेन मनसापश्यमंतितस्तं मा
ता रेढि स उ रेढि मातरमिति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसे
न स्वर्गेण लोकेन सर्वमायुरेत्यथातः प्रजापति संहिता जाया पूर्वरूपं पतिरुत्तररूपं पुत्रः संधिः प्रजन

वा पृथिव्यावंतरेणाकाशस्तस्मिन्छिन्नाकाशे प्राण आयत्तो यथामुष्मिन्नाकाशे वायुरायत्तो यथामू
नि त्रीणि ज्योतींष्येवमिमानि पुरुषे त्रीणि ज्योतींषि यथासौ दिव्यादित्य एवमिदं शिरसि चक्षुर्यथासावं
तरिक्षे विद्युदेवमिदमात्मनि हृदयं यथायमग्निः पृथिव्यामेवमिदमुपस्थे रेत एवमु हास्य सर्वं लोकमा
त्मानमनुविधायाहेदमेव पृथिव्या रूपमिदं दिवः स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यश
सा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥२॥ अथातो निर्भुजप्रवादाः पृथिव्यायतनं निर्भुजं दिवा
यतनं प्रतृण्णमंतरिक्षायतनमुभयमंतरेणाथ यद्येनं निर्भुजं ब्रुवंतमुपवदेदच्योष्ठावराभ्यां स्थानाभ्या
मित्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवंतमुपवदेदच्योष्ठा उत्तराभ्यां स्थानाभ्यामित्येनं ब्रूयाद्यस्त्वेवोभयमं
तरेणाहतस्य नास्त्युपवादो यद्धि संधिं विवर्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहर
ति तत्प्रतृण्णस्याग्र उ एवोभयमंतरेणोभयं व्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्ण
मुभयकाम उभयमंतरेणाथ यद्येनं निर्भुजं ब्रुवंतं परउपवदेत्पृथिवीं देवतामारः पृथिवी त्वा देवता
रिष्यतीत्येनं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवंतं परउपवदेद्दिवं देवतामारो द्यौस्त्वा देवता रिष्यतीत्येनं ब्रू

॥

त्मं यान्यक्षराण्यधिदैवतमवोचामास्थीनि तान्यध्यात्मं यान्यूष्मणोऽधिदैवतमवोचाम मज्जानस्तेऽध्या
त्ममेष ह वै संभूति प्राणो यन्मज्जेत द्रेतो न ह वा ऋते प्राणाद्रेतः सिच्यते यद्वा ऋते प्राणाद्रेतः सिच्येत पू
२५ येन्न संभवेदथो संधीनधिदैवतमवोचाम पर्वाणि तान्यध्यात्मं तस्यैतस्य त्रयस्यास्थ्नां मज्ज्ञां पर्वणामि
ति पंचेतश्चत्वारिंशाच्छतानि पंचेतत्तदशीति सहस्रं भवत्यशीति सहस्रं वा अर्कलिनो बृहतीरहरभि
संपादयंति स एषो क्षरसंमानश्चक्षुर्मयः श्रोत्रमयश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एव
मेतमक्षरसंमानं चक्षुर्मयं श्रोत्रमयं छंदोमं मनोमयं वाङ्मयमात्मानं वेदाक्षराणां सायुज्यं सरूपतां स
लोकतामश्नुते पुत्री पशुमान्भवति सर्वमायुरेति ॥२॥ चत्वारः पुरुषा इति बाध्वः शरीरपुरुषश्छंदःपु
रुषो वेदपुरुषो महापुरुष इति शरीरपुरुष इति यमवोचाम स य एवायं दैहिक आत्मा तस्य योयमशरीरः
प्रज्ञात्मा स रसश्छंदःपुरुष इति यमवोचामाक्षरसमाम्नाय एव तस्यैतस्याकारो रसो वेदपुरुष इति य २
मवोचाम येन वेदान्वेदकं ऋग्वेदं यजुर्वेदं सामवेदं तस्यैतस्य ब्रह्मा रसस्तस्माद्ब्रह्माणं ब्रह्मिष्ठं कुर्वीत
यो यज्ञस्योल्बणं पश्येन्महापुरुष इति यमवोचाम संवत्सर एव प्रध्वंसनं न्यानि भूतान्येकान्याभावय
य

न्यानि तस्यैतस्यासावादित्यो रसः स यश्चायमशरीरः प्रज्ञात्मा यश्चायमसावादित्य एकमेतदि
ति विद्यात्तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति तदप्येतदृषिणोक्तं चित्रं देवानामुदगादनीकं चक्षुर्मि
त्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्चेत्येतामनुविधं
संहितां संधीयमानां मन्य इति ह स्माह बाध्व एतं ह्येव बह्वृचा महत्युक्थे मीमांसंत एतमग्नावध्वर्यव ए स
तं महाव्रते छंदोगा एतमस्यामेतं दिव्येतं वायावेतमाकाश एतमप्स्वेतमोषधीष्वेतं वनस्पतिष्वेतं चंद्र
मस्येतं नक्षत्रेष्वेतं सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते स एष संव क्षरसंमानश्चक्षुर्मयः श्रोत्रम
यश्छंदोमयो मनोमयो वाङ्मय आत्मा स य एवमेतं संवत्सरसंमानं चक्षुर्मयं श्रोत्रमयं छंदोमयं मनो
मा मयं वाङ्मयमात्मानं परस्मै शंसति ॥३॥ दुग्धदोहा अस्य वेदा भवंति न तस्यानूक्ते भागोऽस्ति न वेद सुकृ
तस्य पंथानमिति तदप्येतदृषिणोक्तं यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति । यदीं
शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पथामिति न तस्यानूक्ते भागोऽस्ति न वेद सुकृतस्य पंथानमि
त्येतत्तदुक्तं भवति तस्मादेवंविद्वान्न परस्मा अग्निं चिनुयान्न परस्मै महाव्रतेन स्तुवीत न परस्मा एत

अ॰
२६

दृहःशंसेकामंपित्रेवाचार्यायवाशंसेदात्मनएवास्यतत्कृतंभवतिसयःश्वायमशरीरःप्रज्ञात्मायश्चा
सावादित्यएकमेतदित्युवाचामतोयत्रविहीयतेचंद्रमाइवादित्योदृश्यतेननरश्मयःप्रादुर्भवंतिलोहिनी
द्यौर्भवतियथामंजिष्ठाव्यस्तःपायुःकाककुलायगंधिकमस्यशिरोवायतिसंपरेतोस्यात्मानचिरमि
वजीविष्यतीतिविद्यात्सयत्करणीयंमन्येततत्कुर्वीतयदंतिपच्चदूरकंइतिसप्तजपेदादित्यलस्थेःतस
इत्येकायत्रब्रह्माएवमानेतिषकुद्वयंतमसस्परीत्येकाथापियत्रछिद्रइवादित्योदृश्यतेरथनाभि
रिवाभिख्यायेतछिद्रांवाछायांपश्येत्तदप्येवमेवविद्यादथाप्यादर्शेवोदकेवाजिह्मशिरसंवाशिरसं
वात्मानंपश्येद्विपर्यस्तेवाकन्याकेजिह्मेनवादृश्येयातांतदप्येवमेवविद्यादथाप्यपिधायाक्षिणीउपे
क्षेततद्यथाबहरकाणिसंपततीवदृश्यंतेतानिचेदानपश्येत्तदप्येवमेवविद्यादथाप्यपिधायकर्णा
उपश्रृणुयात्सएषोग्नेरिवप्रज्वलतोरथस्येवोपब्दिस्तंयदानश्रृणुयात्तदप्येवमेवविद्यादथापियत्र २
नीलइवाग्निर्दृश्यतेयथामयूरग्रीवामेघेवाविद्युतंपश्येन्मेघेवाविद्युतंनपश्येन्महामेघेवामरीची
रिवपश्येततदप्येवमेवविद्यादथापियत्रभूमिंज्वलंतीमिवपश्येततदप्येवंविद्यादितिप्रत्यक्षदर्शी

नंसंधानंसेषादितिःसंहितादितिर्हीदंसर्वंयदिदंकिंचपिताचमाताचपुत्रश्चप्रजननंचतदप्येतदृषिणोक्त
मदितिर्मातासपितासपुत्रइतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेन
ला स्वर्गेणलोकेनसर्वमायुरेतिसर्वमायुरेति॥६॥ इतितृतीयोपनिषत्सुप्रथमोध्यायः॥ ॥प्राणोवंशइति
स्थविरःशाकल्यस्तद्यथाशालावंशेसर्वेन्येवंशाःसमाहितास्युरेवमस्मिन्प्राणेचक्षुःश्रोत्रंमनोवागिंद्रि
याणिशरीरंसर्वआत्मासमाहितस्तस्यैतस्यात्मनःप्राणऊष्मरूपमस्थीनिस्पर्शरूपंमज्जानःस्वररू
पंमांसंलोहितमित्येतदन्यच्चतुर्थंतस्यान्नरूपमितिह्रस्माहहृस्वोमांडूकेयस्त्रयंत्वेवनएतत्प्रोक्तं
तस्यैतस्यत्रयस्यास्थ्नांमज्ज्ञांपर्वणामितित्रीणिषष्टिशतानित्रीणीतस्तोनिसप्तविंशतिशतानिसर्वे
तिसप्तचवेशतानिविंशतिश्चसंवत्सरस्याहोरात्रास्तएषोहस्समानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयो
मनोमयोवाङ्मयआत्मासयएवमेतमहःसमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानं
वेदाह्नांसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति॥१॥ अथकौंतरव्यस्त्री
णिषष्टिशतान्यक्षराणांत्रीणिषष्टिशतान्यूष्मणांत्रीणिषष्टिशतानिसंधीनांयान्यक्षराण्यवोचाम
हानितानियान्यूष्मणोवोचामरात्रयस्तायासंधीनवोचामाहोरात्राणांतेसंधयइत्यधिदैवतमथा

२८

ष्याः स्पर्शयितव्या इत्येव मंत्रः आह्ववतीः तद्ध्वविदित्येव मत्स्योत्राह्ववतीत द्ध्वविती यथा त्वेवैयं लोमशेन चर्मणापि
हिता स्त्वत्येवमत्स्यो लोमशेन चर्मणा पिहिता लोमशेन ह स्म वै चर्मणा पुरा वीणा अपिदधति स्म यो
हितां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्रास्य कीर्तिर्भवति यत्र क्व चार्या वाचो भाषंते विदुरेनं तत्रा
थातो वाग्रसो यस्यां संसदि अधीयानो वा भाषमाणो वा न विरुरुत्सुषैतत्रेतामृचं जपेदोष्ठापिधाना नत
कुली दंतैः परिवृता पविः स सर्वस्यै वाच ईशाना चारु मामिह वादयेदिति वाग्रसः ॥५॥ अथ हास्मा
एतत्कृष्णहारितो वाग्ब्राह्मणमिवोपोदाहरति प्रजापतिः प्रजाः सृष्ट्वा व्यस्रंसत संवत्सरः स छंदो
भिरात्मानं समदधाद्यच्छंदोभिरात्मानं समदधात्तस्मात्संहितां तस्यै वा एतस्यै संहितायै णकारो बलं
षकारः प्राण आत्मा स यो हैतौ णकारषकारावनुसंहितमृचो वेद सबलां सप्राणां संहितां वेदायुष्य
मिति विद्यात् स यदि विचिकित्सेत्सणकारं ब्रवाणी३ अणकारा३ इति सणकारमेव ब्रूयात्सषका २
रं ब्रवाणी३ अषकारा३ इति सषकारमेव ब्रूयात्ते यद्वयमनुसंहितमृचो धीमहे यच्च मांडूकेयीयमध्या
यं प्रब्रूमस्तेन नो णकारषकारावुपाप्ताविति ह स्माह ह्रस्वो मांडूकेयोथ यद्वयमनुसंहितमृचो धीमहे

यच्च मांडूकेयीयमध्यायं प्रब्रूमस्तेन नो णकारषकारावुपाप्ताविति ह स्माह स्थविरः शाकल्य एतद्ध स्म
वै तद्विद्वांस आहुरृषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं
जुहुमः प्राणे वा वाचं यो ह्येव प्रभवः स एवाप्ययस्ता एताः संहिता नानंतेवासिने प्रब्रूयान्नासंवत्स
रवासिने नाप्रवक्त्रे इत्याचार्या आचार्याः ॥६॥ इत्यैतरेयतृतीयोपनिषत्सु द्वितीयोध्यायः ॥ श्रीः
ॐ विदा मघवन्विदा गातुमनुशंसिषो दिशः ॥ शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥१॥ आभि
ष्ट्वमभिष्टिभिः प्रचेतन प्रचेतय ॥ इंद्र द्युम्नाय न इष एवा हि शक्रः ॥२॥ राये वाजाय वज्रिवः शविष्ठ
वज्रिन्नृंजसे ॥ मंहिष्ठ वज्रिन्नृंजस आ याहि पिब मत्स्व ॥३॥ विद्मा रायः सुवीर्यं भुवो वाजानां पतिर्वशाँ वा
अनु ॥ मंहिष्ठ वज्रिन्नृंजसे यः शविष्ठः शूराणां ॥४॥ यो मंहिष्ठो मघोनामंशुर्न शोचिः चिकित्वो अभि नो नय ॥ इं
द्रो विदे तमु स्तुषे वशी हि शक्रः ॥५॥ तमूतये हवामहे जेतारमपराजितं ॥ स नः पर्षदति द्विषः क्रतुश्छं
दऋतं बृहत् ॥६॥ इंद्रं धनस्य सातये हवामहे जेतारमपराजितं ॥ स नः पर्षदति द्विषः स नः पर्षदति द्वि

अ
२८

यः॥९॥पूर्वस्ययत्तेअद्रिवःसुम्नआधेहिनोवसो।पूर्तिःशविष्ठशस्यतईशेहिशक्रः॥१०॥नूनंतंनव्यंसन्य
सेप्रभोजनस्यवृत्रहन्॥समन्येषुब्रवावहैशूरोयोगोषुगच्छतिसखासुशेवोअद्वयाः॥११॥एवाह्येवैवाह्य
ग्नारुद्र।एवाह्येवैवाहीन्द्र।एवाह्येवैवाहिविष्णोउ॥एवाह्येवैवाहिपूषन्।एवाह्येवैवाहिदेवाः।एवाहिश
क्रोवशीहिशक्रोवशांअनु।आयोमन्यायमन्यवउपोमन्यायमन्यवे।उपहिविश्वधा।विदामघवन्वि
दाउमम्॥॥छ॥ॐइतिचतुर्थारण्यकंसंपूर्णम्॥महाव्रतस्यपंचविंशतिंसामिधेन्यएकविंशतीमागु
पोत्तमायाःसमिध्याग्निमितिचतस्मोवैश्वकर्मणऋषभंउपांश्वाज्यप्रउगेविश्वजितोहोत्राश्चतुर्विंशा
उपालंभनीयं दीरवयंतीरपस्फवदितिचब्राह्मणाच्छंस्यावपेतप्रातःसवनेतीव्रस्याभिवयसोअस्यपाहीतिमाध्यंदि
नेत्रिकद्रुकेषुमहिषोयवाशिरमितिस्तोत्रियंऐंद्र्यापुनःपरावतइंद्रायहिद्यौरसुरोअनम्नतप्रो
क्षसेपुरोरथमित्यतोनुरूपश्चतुर्विंशान्मरुत्वतीयस्यातानोसत्कमेऊतिःसाभिवेगःपिबासो
ममभियमुग्रतर्दःकयाशुभासवयसःसनीळामरुत्वांइन्द्रवृषभोरणाय।जनिष्ठाउग्रःसहसेतुराये
तिमरुत्वतीयंसंस्थितेमरुत्वतीयेहोताविसंस्थितसंचरेणनिष्क्रम्याग्नीध्रीयेतिस्रआज्याहुतीर्जुहोति

नान्यथस्वप्नाःपुरुषंकृष्णंकृष्णदंतंपश्यतिसएनंहंतिवराहएनंहंतिमर्कटएनमास्कंदयत्याशुवायुरेनंप्रवहतिसुव
र्णंखादित्वापगिरतिमध्वश्नातिबिसानिभक्षयत्येकपुंडरीकंधारयतिखरैर्वराहैर्युक्तैर्यातिकृष्णांधेनुंकृष्णव
त्सांनलदमालीदक्षिणामुखोव्राजयतिसयद्येतेषांकिंचित्पश्येदुपोष्यपायसंस्थालीपाकंश्रपयित्वारा
त्रीसूक्तेनप्रत्यृचंहुत्वान्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्राश्नीयात्सयोतोऽश्रुतोगतोमतोनतो
दृष्टोविज्ञातोनादिष्टश्रोतामंताद्रष्टादृष्टाघोष्टाविज्ञाताप्रज्ञातासर्वेषांभूतानामंतरपुरुषःसमआत्मे
तिविद्यात्॥४॥अथखल्वियंसर्वस्यैवाचउपनिषत्सर्वाह्येवेमाःसर्वस्यैवाचउपनिषदइत्येतांत्वेवाचक्षते
पृथिव्यारूपंस्पर्शाअंतरिक्षस्योष्माणोदिवःस्वराअग्नेरूपंस्पर्शावायोरूष्माणआदित्यस्वराऋग्वेद स्य
स्यरूपंस्पर्शायजुर्वेदस्योष्माणःसामवेदस्यस्वराश्चक्षुषोरूपंस्पर्शाःश्रोत्रस्योष्माणोमनसःस्वराःप्रा
णस्यरूपंस्पर्शाअपानस्योष्माणोव्यानस्यस्वराअथखल्वियंदैवीवीणाभवतितदनुकृतिरसौमानु
षीवीणाभवतियथास्याःशिरएवममुष्याःशिरोयथास्याउदरमेवममुष्याअंभणंयथास्यैजिह्वैवममुष्यै
वादनंयथास्यास्तंत्रयएवममुष्याअंगुलयोयथास्याःस्वराएवममुष्याःस्वरायथास्याःस्पर्शाएवमस्

तंपिबा३इदंमधू३इदंमधितिचप्रेष्याःसंशास्तिपूर्णकुंभास्तिस्रोवमाःषकुत्तमादूमंधिष्ण्यमुदकुंभंच
२८ त्रिःप्रदक्षिणंपरिव्रज्याथदक्षिणैःपाणिभिर्दक्षिणानूरूनाघ्नानाएत्येवा३इदंमधू३इदंमधितिवद
त्यः॥१॥उपाकृतेस्तोत्रेत्रेधंनिनयाथाग्नीत्तरेचमार्जालीयेशेषमंत्रवेदीतिप्रदक्षिणमग्निंनिष्क्रम्या
णपूर्वंपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्नग्नेःशिरउपतिष्ठतेनमस्तेगायत्रायतेशिरइतितेनैवयथेतं प
प्रत्येत्यदक्षिणमुदङ्मुखःपक्षंनमस्तेराथंतरायपक्षेदक्षिणःपक्षइत्यपरेणाग्निंपुच्छमतिक्रम्य
प्राङ्मुखउत्तरंनमस्तेबार्हतायपक्षउत्तरःपक्षइतिपश्चात्प्राङ्पुच्छंनमस्तेभद्राययज्ञपुच्छंपातेप्र
प तिष्ठेतिदक्षिणतःपुच्छस्यात्मानंनमस्तेराजनायपंस्तआत्मेति॥२॥यथेतंसदःप्रसर्पतिपुरस्ता
त्प्रेंखउपक्रमतोभवतिस्थूणेरज्जूवीवधइत्येतत्प्रक्षाल्यतीर्थेनप्रपाद्योत्तरेणाग्नीध्रीयंपरिव्रज्य
पूर्वयाद्वारासदःसर्वौधिष्ण्यानुत्तरेणौदुंबराणिकाष्ठानिप्रेंखस्यभवंतिपालाशानिमिश्राणि
वार्त्रीणिफलकान्युभयतस्तष्टानिद्वेवासूच्यश्चतावत्यदूष्णुमात्रःप्राङ्प्रेंखोनिमुष्टिकस्तिर्य

ङुदग्रःप्रागग्राभ्यांसूचीभ्यांसमुतौदक्षिणोत्तरेस्थूणेनिखायाभितोहोतृषदनंवीवधमत्या
दध्यात्यास्यसंमितंकर्तुःकृष्णासुक्तिद्राणिप्रेंखस्यभवंतिरज्जूभ्यामूर्ध्वमुद्यपातिदक्षिणतो
दक्षिणयोत्तरलःसव्यपादार्थ्यौत्रिगुणास्यातांसव्यदक्षिणेपंचव्यायामेद्विगुणेवीवधेत्रिःप्रद
क्षिणंपर्यस्योर्ध्वग्रंथिंनिष्कर्षंबध्नातिशाखाभिर्दसीभिर्वापधृष्टंत्यप्रकंपिचतुरंगुलेने
षविश्रसःप्रेंखस्यान्मुष्टिमात्रेणवादक्षिणतउदाहिततरःसमोवापदमात्रेधिष्ण्यात्॥३॥
निक्षिप्तेप्रेंखेहोतावाणमौदुंबरंशततंतुंमुष्टिभ्यांपरिगृह्योत्तरतउपोहतेयथावीणांसम्र
भिश्छंदोभिश्चलरुत्तरैस्थानान्यस्योर्ध्वमुद्गृह्णीयाद्दशभिर्वागायत्रेणत्वाछंदसोदूहाम्यौ
ष्णिहेनत्वानुष्टुभेनत्वाबार्हतेनत्वापांक्तेनत्वात्रैष्टुभेनत्वाजागतेनत्वावैराजेनत्वाद्वैपदेनत्वा
तिछंदसात्वेतिछंदांस्यनुक्रम्यस्थानीनामनुपरिक्रमणमौदुंबर्याद्र्याशाखयासपलाशया
यामूलदेशेनवाणंत्रिरूर्ध्वमुल्लिखतिप्राणायत्वापानायत्वाव्यानायत्वोल्लिखामीत्यन्येभ्यो

अ०

३०

पिकामेभ्यः पुनरपि न लप्स्ये खामीति ब्रूयादथैनं सशाखं छंदोगेभ्यः प्रयच्छति श्रुतेभ्यस्त्वेति पश्चा
द्वै फलके पाणी प्रतिष्ठापयति प्राणमनुप्रेंखस्वेति प्रांचं प्रेंखं प्रणयति व्यानमनुवीखस्वेति ति
र्यंचमपानमन्वीखस्वेत्यभ्यात्मं भूर्भुवः स्वरिति जपति प्राणायत्वेति प्रांचमेव व्यानायत्वेति तिर्यं
चमपानायत्वेत्यभ्यात्ममेव सवस्त्वा गायत्रेण छंदसारोहं तु तानन्वारोहामीति पश्चाद्वै फलके र
ली प्रतिष्ठापयत्यथ पूर्वं फलकं नाना पाणिभ्यामभिपद्येत यथा हि स्नपश्य न्मध्यमं कुंकुकेनोपस
ऽद्वयोर्वासंधिं रुद्रास्त्वा त्रैष्टुभेन छंदसारोहं तु तानन्वारोहामीति दक्षिणं सक्थ्यति हरत्यादि
त्यास्त्वा जागतेन छंदसारोहं तु तानन्वारोहामीति सव्यं विश्वे त्वा देवा आनुष्टुभेन छंदसारोहं तु
तानन्वारोहामीति समारोहति पश्चात्त्वस्य धिष्ण्यस्य दक्षिणं पादं प्रांचं प्रतिष्ठापयत्यथ सव्यं
त यदेतरः श्राम्यदथैरं यदेतरो थलरं नोभौ विश्वमोक्तु याल्कू चान्होत्रकाः समारोहंति ब्रह्मा चो
दुंबरीमासंदीमुद्गातायदिक स्मे चिदव वयकर्मिणो अभिषेदाहित्यपालं प्राङ्वरुह्य चारि

दुंबरेण स्रुवेणानु मामिंद्रो अनु मा बृहस्पतिरनु सोमो अनु वाग्देव्यावीत् । अनु मां मित्रावरुणाविहा
वतामनु द्यावापृथिवी पूर्वहूतौ ॥ आदित्या मा विश्वे अवंतु देवाः सप्तराजानो य उदाभिषिक्ताः । वा
युः पूषा वरुणः सोमो अग्निः सूर्यो नक्षत्रैरवलिहमानः ॥ पितरो मा विश्वमिदं च भूतं पृश्निमातरो मरु
तस्वर्काः ॥ ये अग्निजिह्वा उत वा यजत्रास्ते नो देवाः सुहवाः शर्म यच्छंत्विति दक्षिणे मार्जालीये दत्वा स्रु
च्युत्तमां चतुर्गृहीतं पूर्वमवदायोत्तरतोग्नेरुपनिधाय विहरणप्रभृति मध्यंदिने मार्जालीयो आगारितो
भवति तस्मिन्परिवृते जुहोति प्राग्द्वारे वोदग्द्वारे वा प्रागुदग्द्वारे वाग्निरिवौषधीभ्यः पृथिवीव सुषदा भूया नाद
समंतरिक्षमिवानाध्यो द्यौरिवानाधृष्यो भूयासं सूर्य इव प्रतिष्ठश्चंद्रमा इव पुनर्भूर्भूयासं मन
इव पूर्वं वायुरिव श्लोकभूर्भूयासमहरिव स्वं रात्रिरिव प्रियो भूयासं गाव इव पुनर्भुवो मिथुनमिव मरी
चयो भूयासमाप इव रस ओषधय इव रूपं भूयासं मन्त्रमिव दक्षिण्य इन्द्र इव प्रभूर्भूयासं ब्रह्मेव लोके क्ष भु
त्रमिव श्रियो भूयासं पयस्वन्य इवास मिति सर्वदाती अत्र विभजाथ वीथेति त्रीण्यनन्तं चमत्र तिष्ठन्नादि
त्यमुपतिष्ठते पर्यावृत्त मद्दक्षिणमावृत्यै नैश्चे वा स्वाहाकारेण त्येवा २ इदं मधु इदं मधु इमं तीव्रसु

३१ यंत्वाद्यं त्रिष्टुभमिंद्रं दुग्भिं पत्न्यश्वकांडवीणाहतानां चमेथुनं ब्रह्मचारिपुंश्चल्योः संप्रवादो नेवे
नसाम्ना निष्केवल्यायस्तुवते राजनस्तोत्रियेण प्रतिपद्यते ॥ ॥ तदिदास भुवनेषु ज्येष्ठं तं
सुतेकीर्तिमाघवन्महित्वा भूयदद्वा वृधेवीर्यपा न्नणा मुत्वान्नतमंगीर्भिरुक्थैरिति त्रिस्त्रो
त्रद्दैकेस्वादोः स्वादीयस्वादुनास्वजासमदः सुमधुमधुनाभियोधीरित्यात्मनएतेपदे
ड्त्यपक्षपदे प्रत्यवदधात्यश्वायंतोमघवन्निंद्र वाजिनो गामश्वं रथ्यमिंद्र संकिरेत्येतयो
श्वस्यानद्दतरेष्ठियमहगोरश्मम्मा तं षन्ने संपक्षयोः पतनाय नदं वऊं दतीनामित्येतये ता
निव्यतिषजतिपादैः पादान्बृहतीकारं नदवं त्व्यक्तराणि प्रथमायां च पुरुषाक्षराण्युपधातिपा
दवैकेकमवसानेत् तीयवर्जं सखल्लुविहरत्यपि निदर्शनायोदाहरिष्यामः । तदिदासभुवने ६
भुवनेषु ज्येष्ठंपु नदं वऊं दतीनाम् । यतो जज्ञउग्रस्त्वेषन्नृम्णो रुनदं यो सुवती नो मऊ सद्यो ७
जज्ञानो निरिणाति शत्रून्नपतिंवो अघ्न्यानां । अनुयं विश्वेमदंत्यूमाः षो चेन्नूनानिषु ध्यसामि

त्येवमेतं त्रिरभ्यासुचेत्समाम्नातासु राजनेन साम्नास्तुवीरन्यथास्थानं ताइहैवे मा असमाम्ना
तासुचेत्स्तुवीरं त्समाम्नातथ्यतावतीरुद्धृत्य तत्र ताः शंसेदिहो एवमा अन्यासु चेत्प्राक्सूददो
शस्वर हसस्तास्तदिदासेत्येतदाथिमां विहृतश्चात्र प्रतिगरस्ता अस्य सूददोहसइत्येतदादिः सूद
दोहाः सूददोहाः ॥ ६ ॥ इति पंचमारण्यके प्रथमोध्यायः ॥ ॥ श्रीवाः ॥ यस्येदमा रजस्तुजो युजो
जोवनेसहः । इंद्रस्य रंत्यं बृहत् । नाधृषआदधर्षदाधृषाणं धृषितं शवः । पुराय दीमतिव्यथि
रिंद्रस्य धृषितं सहः । स नो ददातु तं रयिं रयिं पिशंगसंदृशं । इंद्रः पतिस्तवस्तमो जनेष्वासूद
दोहाः त्रिरिणायत्रमिंद्रमिद्गाथिनो बृहदित्यन्यासु चेत्समाम्नातासु स्तुवीरन्नुभयासंस्था
नविपर्ययोसमाम्नातासु चेत्स्तुवीरन्निश्रासु च सूक्तस्योत्तमां सूददोहां विजवः । सुतस्ते सो
मपव्याहियद्दंमत्स्वामदं पुरुवारं मघाय । महिष्ठद्र विज्ञ रोगणश्यो । ससाह्वत्रुवैनहत्येषु
शत्रून्नमुर्विगाहएषः । स नो नेतारं महयामइंद्रं । इंद्रो वसु समजः पर्वतेष्ठाः प्रतिवामजीबी । इं

अ० डः शाम्बद्धिर्जीहृत्त्र एवेः स्रुदद्दोहाइत्येतत्त्रयं ग्रीवाः शिरो विजवः सर्वमर्द्धर्चमरा राथंतरो दक्षिणः
पक्षोभित्वाभ्रर नोनुमोभित्वापूर्वपीतयइतिरथंतरस्यस्तोत्रियानुरूपौप्रगाथौचतस्रः स
३२ तीः षड्बृहतीः करोतीद्रस्यनुवीर्याणिप्रवोचंत्वेहपत्नितरश्विन्नइंद्रेतिपंचदशपक्षिग्मभ्रं
गो वृषभोनसीउग्रोजज्ञेवीर्यायस्व धावानुद्रुब्रह्माण्येरतभ्रवस्यातिमहइंद्रोत्यकयेतिपंचस्तो
मोन्यानइंद्रोद्दूरादानआसाक्षितिसंपातइत्याहिसोमइन्मदइतिपंक्तिःस्रुदद्दोहाबार्हतउ
त्तरस्त्वामिद्धिहवामहेत्वंत्येहिचेरवइतिबृहतःस्तोत्रियानुरूपौप्रगाथौचतस्रःसतीःषड्बृह
तीः करोतितमुष्टुहियोअभिभूत्योजाःसुतइत्वेनिमिश्लइंद्रसोमइतित्रीण्यभ्यरेकोरयिपतिर
ध यीणामित्यष्टौसूक्तानिकथामहामवृधत्कस्यहोतुरितिसंपातइंद्रोमदायवावृधइतिपंक्तिः
स्रुदद्दोहाराथंतरोदक्षिणःपक्षःपंचदशस्तोमएकत्रातंवसिष्ठप्रासाहोबार्हतउत्तरःसप्तदशस्तो ३
मोभिरात्रंभरद्वाजप्रासाहोभइंद्रपुच्छंद्विपदास्विमानुकंभुवनासीषधामापाहिवनसासहे
तिनवसमाम्नाताअथासमाम्नाताःप्रवइंद्रायबृहतेमाषविप्रागाथंगायतयक्रुओषतां

त्वातमर्थमेवमेवाजपेयावृतोरोहेत ध भस्तोत्रारंसंस्थास्तिपंचविंशस्यस्तोमस्यतिसृषु धृत्य
तीयास्वर्द्धत्रयोदशासुवापरिशिष्टासुप्रथमंप्रतिहारंप्रकृत्वादित्यर्धत्रयोदशासुप्रवाचय
तेतिजात्रकर्ण्यःप्रोक्तेजपतिसुपर्णोसिगरुत्मान्त्रिमांवाचंवदिष्यामि।बहुवदिष्यंतीबहुपलि
ष्यंतीबहुकरिष्यंतीबहुसनिष्यंतीबह्वोर्भुयःकरिष्यंतीस्वर्गवंतीस्ववदिष्यंतीस्वःपतिष्यंती
स्वःकरिष्यंतीस्वःसनिष्यंतीस्वरिमंयज्ञंवक्ष्यंतीस्वर्मेयजमानंवक्ष्यंतीमितिदीक्षितेयजमान
शब्देनादीक्षितेस्वरमुमितियोस्यप्रियस्यान्नतुवक्ष्यंतीमितिब्रूयादुक्थ्यवीर्याणिचसंप्रा
णोवाचासमहंवाचासंचक्षुर्मनसासमहंमनसासंश्रोत्रमात्मनासमहमात्मनामयिमहि
मयिभर्गोमयियशोमयिश्रुतोमयिस्तोभोमयिस्तोमोमयिश्लोकोमयिघोषोमयियशोम
यिश्रीर्मयिकीर्तिर्मयिमुक्तिरित्याहूयवागितिजपतित्रयआह्वावाःशस्त्रादेर्निविदःपरिधा
नीयायाइतिशाहानध्वर्यवःकारयंत्येतस्मिन्नहनिप्रभृतमन्नंदद्याद्राजपुत्रेणचर्मव्याध

स्तुतस्य रसिन इति विंशतिः सप्तमी चाष्टमी चोद्धरति यदिंद्र प्रागपागुदगिति चतुर्दश वयं घ त्वा सुतावंत इति
३२ पंचदश मो षु त्वा वाघतश्चनेत्येतस्य द्विपदां चोद्धरति राथंतरं च प्रगाथमथा ह्यस्य नकिः सुदासो रथ
मित्येतं प्रगाथमुदुत्यत्वा मिदा त्वो नर इत्येतं प्रगाथं प्रत्यवदधात्यभि प्रवः सुराधसमिति षड्वालखि
ल्यानां सूक्तानि यः सत्राहा विचर्षणिरिति शेषो यं ते अस्तु हर्यत इति सूक्ते उभयं शृणवच्च न इति सप्त
मी चाष्टमी चोद्धरति तरोभिर्वो विदद्वसुमित्येतत्तमामुद्धरति यो राजा चर्षणीनामित्येकादशं तं वो द
स्ममृतीषहमा नो विश्वासु हव्यो य इंद्रस्तुज आ भर इति नव सूददोहाः ॥ ४ ॥ ओक्षिहीत्वचारीति
यदिंद्र सोमपातम इति सूक्ते तम्वभि प्रगायत इत्येतत्तमामुद्धरतींद्राय साम गायत सखाय आ शि
षामहीति तिसृ उत्तमा उद्धरति य एक इद्विदयत आ याह्यद्रिभिः सुतं यस्य त्यच्छंबरं मद इति त्र्यृ
स्त्वा गायत्र्यः संपद्योष्णिहः सप्त सप्त गायत्र्यः षट्ककुब्ष्णिहो भवंति यदिंद्राहं यथा त्वं प्र सम्राजं
चर्षणीनामिति सूक्ते उत्तरस्या उत्तमे उद्धरति वार्त्रहत्याय शवस इत्येतत्तमामुद्धरति सुरूपकृत्नुमू ३२
तय इति त्रीण्येंद्र सानसिं रयिमिति सूक्ते य आ न यत्परावत इति तिसृ उत्तमा उद्धरति रेवतीर्नः

सधमाद इति तिसृः सूददोहा इत्येतास्तिस्रस्तृचारीतयः सर्वा अर्धर्चशो अन्नमशीतय उदरं बश
स्त्वावतः पुरूवसविति विवशः सनितः सुसनितरित्येतदंतोदद्री रिक्ण इति द्विपदा नूनमथेत्येकपदा
ता अस्य सूददोहस इत्येतदंतः सूददोहाः सूददोहाः ॥ ५ ॥ ऊन्नू ॥ इंद्राग्नी युवं सु न इत्येतस्यार्धर्चे गा
यत्रीकारमुत्तरमुत्तरस्यानुष्टुप्कारं प्रागुत्तमायाः प्रवो महे मंदमानायांधस इति निविद्धानं वनेन वा
यो न्यधायि चाकन्यो जात एव प्रथमो मनस्वानिति ते अंतरेणायात्यवर्कुः प्रवं धुरे स्था विधुं दद्राणं
समने बहूनामित्येतदावपनं दशतीनामैंद्रीणां त्रिष्टुब्जगतीनां बृहतीसंपन्नानां यावतीरावपेर
स्तावंत्पूर्धमायुषो वर्षाणि जिजीविषेत्संवत्सरात्संवत्सरादशतोनवात्यमृषु वाजिनं देवजूतमिं
द्रो विश्वं विराजतीत्येकपदे द्वं विश्वा अवीवृधन्नित्यानुष्टुभं तस्य प्रथमायाः पूर्वमर्धर्चं शस्त्वोत्तरे
णार्धर्चेनोत्तरस्याः पूर्वमर्धर्चं व्यतिषजति पादैः पादाननुष्टुप्कारं प्रागुत्तमायाः पूर्वस्मात्पूर्वस्मा
दर्धर्चादुत्तरमुत्तरमर्धर्चं व्यतिषजति प्रकृत्याशेषः पिबा सोममिंद्र मंदतु त्वेति षड्योनिष्ट इंद्र सध

इति द्वितीयो
ध्यायः ॥ २

अ॰ नेअकारीत्येतस्यचतस्रः शस्त्वोत्तमामुपसंतत्योपोत्तमया परिदध्यान्निपरिदितउक्थ्यउक्थ्यसं
दंजपत्युक्थ्यवीर्यस्यस्थानेउक्थ्यदोहः ॥१॥ मूर्द्धा लोकानामसि वाचो रसस्तेजः प्राणस्यायतनं मन
३४ सस्संवेशश्चक्षुषः संभवः श्रोत्रस्य प्रतिष्ठा हृदयस्य सर्वे । इंद्रः कर्माक्षितममृतं व्योम । कतं सत्यं दी
क्षिग्यानंविवाचनमंतोवाचोविभुः सर्वस्मादुत्तरं ज्योतिरूधरप्रतिवादः पूर्वं सर्वे वाक्पराग्वाक्सप्रस
लिलंप्येरूपिन्वति । चक्षुः श्रोत्रं प्राणः सत्यसम्मितं वाक्प्रभृतं मनसा विभृतं हृदयोग्रं ब्राह्मणाभृ
तमन्नभृभेवर्षपवित्रं गोभर्गंपृथिव्युपरं वरुणं वैप्यितमंतपस्तन्विंद्रज्येष्ठं सहस्रपारमयुताक्ष
रमम्रुतंदुहानं । एतास्तउक्थ्यभृतय एता वाचो विभृतयः । ताभिर्मद्रूहपुक्ष्वामतस्याश्रियंमहीम्
प्रजापतिरिदंब्रह्मवेदानां संस्रजे रसं म्रातेनाहं विश्वमाप्यासं सर्वान्कामांदुहामहतः भूर्भुवः स्वश्छं
दो वेदोसि । ब्रह्मप्रजां मे पुक्ष्व । आयुः प्राणं मे धुक्ष्व । पशून्विरांमे धुक्ष्व । श्रियं यशो मे धुक्ष्वा लो
कंब्रह्मवर्चसमभयं । यज्ञसमृद्धिं मे धुक्ष्वेति वाचयत्यध्वर्युमबुद्धेचेदस्यभवत्योमुक्थशाय

चैत्यर्कं देवतास्वर्का आस्तोभतिश्रुतोमुवासइंद्रः उपप्रक्षेमधुमतिक्षियंतः पुष्यंतोरयिंधीमहेत
दा मिंद्रा विश्वलोवन्विश्वलो न आभरयंत्वाशविष्ठमीमहे । सस्रुप्रणीतेन्वतमस्वराळसि मंहिष्ठावाज
सातये । तंत्वेकईत्रिषिसनादमृक्तओजसा । विश्वस्य प्रस्तोभविद्वान्पुरावायदिवेहासन्नूनं । इष
न्नोमित्रावरुणा कत्तनिळांपीवरीमिषंकृणुहीनइंद्रा । त्वां पदं मघंरयिषणिनसोमोअब्रतंदिनोति
नस्पृशाद्रयिः । एषब्रह्मेतितिस्रआ पूर्वस्माइत्येकाम्रूदंहायद्यावानेति धाय्या सूदंदोहाः ॥२॥ गा दो दा
यत्रीत्वाचारीतिर्महां इंद्रोय ओजसेतितिस्रउत्तमाउद्धरतिपुरोळांनोअंधसइतितिस्रइंद्र
सोमपाएकइत्येतस्यश्रुतीनांतिस्रउत्तमाउद्धरति तासांस्वादवः सोमा आयाहीत्येतामुद्धृत्य
नत्वन्यंबक्राकरमित्येतां प्रत्यवदध्यातिउज्ञानोनुराततकतुरित्येकापुरुहूतं पुरुष्टुतमितितिरो
षउद्देदभिश्रुतामध्यमित्यत्तमामुद्धरतिप्रकृतान्यूजीषिणआद्यायेअग्निमिंधुतआतून
इंद्रक्षुमंतमितितिस्रस्तेस्रूदंदोहाः ॥३॥ बार्हतीत्वचारीतिर्माचिदन्यद्विशंसतेत्येकयौत्रिंशासिबा न१

जसोमस्येतीज्यायेसंप्रेषितोयेयजामहइत्यागूर्य नित्येवयजतिव्यवान्येवानुवषट्करोत्यग्नेवषट्कार
नुमंत्रणमाहरत्यध्वर्युरुक्थपात्रमतिग्राह्यांश्चमसांश्चभक्षंप्रतिख्यापहोताप्राङ्प्रख्यादवरोह्य
येतंप्रेंखंप्रत्यंचमववभ्रंतियथात्रांसितारंभक्षयिष्यंतंनोपहनिष्यसीतिप्रेंखस्यपश्चायतनआ
सीनोहोताभक्षयत्यथेतदुक्थपात्रंहोतोपस्पृष्टेनजपेनभक्षयति। वाग्देवीसोमस्यतृप्यतुसो
मोमेराजायुःप्राणायवर्षतु। समेप्राणःसर्वमायुर्दुहामहदित्यंतमाद्याभिप्लविकात्तृतीयसवनमन्वे
ष्वदेवान्निविद्धानादस्यवामस्यपलितस्यहोतुरितिसलिलस्यदैर्घतमसएकचत्वारिंशतमानो
भद्रीयंचतस्यस्थानएकाहिकोवैश्वदेवस्यप्रतिपदनुचरौच्यवेतचेयज्ञायज्ञीयमग्नेतवश्रवोव
यइतिषट्स्तोत्रियानुरूपोयदीकांदंभ्वयसीषुचेत्यग्नेवीरन्नाग्निंनस्वक्तिभिरितितावतीनकुरु
पःसंपन्नंमहाव्रतंसंतिष्ठतइदमहरग्निष्टोमोयथाकालमवभृथंप्रेंखंहरेयुःसंदहेयुर्वासीः २
नादीक्षितोमहाव्रतंशंसेन्नानग्नोनपरस्मैनासंवत्सरइत्येकेकामंपित्रेवाचार्यायवाशंसेदा
त्मनोहैवास्यतद्भक्तंभवतिहोतृत्वास्त्विषूक्थस्यायजसोमस्येत्येकप्रैषःसनाराशंसेघनाराशंसेषुवा

होत्रकाणामुक्थ्यन्नायजन्सोमानामिति तदिदमहर्नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने नो
३५ वासंवत्स[illegible]रवासिने नाब्रह्मचारिणे नासब्रह्मचारिणे नो एवासब्रह्मचारिणे नानभिप्रायै
तदेतन्नभूयः सकृद्दनाद्विर्ग्दनाद्वादेयेव एक एकस्मै प्रब्रूयादिति ह स्माह जातूकर्ण्यो नवके
च न तती यद्भुक्ति न तिष्ठंस्तिष्ठते न व्रजन्व्रजते न शयानः शयानाय नोपर्यासीन उपर्यासीनाया
ध एवासीनो ध आसीनाय नावष्टब्धो न प्रतिस्तब्धो नातिवीतो नांके कृत्वोर्ध्वज्ञुर्न पश्चितो
नधीयीत न मांसं भुक्त्वा न लोहितं दृष्ट्वा न गतासुं नाव्रत्यमाक्रम्य नाक्त्वा नाभ्यज्य नोन्मर्दनं कार
यित्वा न नापितेन कारयित्वा न स्नात्वा न वर्णकेनानुलिप्य न स्रजमपिनह्य न स्त्रियमुपगम्य
नोल्लिख्य नावलिख्य नेदमेकस्मिन्नहनि समापयेदिति ह स्माह जातूकर्ण्यः समापयेदिति
गालवोपदन्यधा तत्त्वचारीति शिष्यः समापयेदेवेत्याग्निवेश्यायनो न्यमन्यस्मिन्द्रोऽत्रामयमानङ् ३५
त्तिपत्रेदमधीयीत न तत्रान्यदधीयीत यत्र त्वन्यदधीयीत नेममिदं तत्राधीयीत नेदमनधीय स्नात का
तको भवति यद्यप्यन्यद्बह्वधीयान्नेवेदमनधीयन्स्नातको भवति नास्मादधीताद्वमाद्यद्य

यन्यस्मात्प्रमाद्येन्नेवास्मात्प्रमाद्येन्नोएवास्मात्प्रमाद्येदस्माच्चेन्नप्रमाद्येदलमात्मैइतिविद्यादलंस
त्यंविद्यान्नेदंविदन्निदंविद्यासमुद्दिष्टोन्नसदृभुंजीतनसधमादीस्यादथातःस्वाध्यायधर्मंव्याख्यास्या
मउपपुराणेनापीतिकक्षोदकेपूर्वाह्णेनसंभिन्नासुछायास्वपराह्णेनाध्यूढ्वेमेघेपर्ज्जेवर्षेत्रिरात्रं
वैदिकेनाध्यायेनांतरियान्नास्मिन्कथांवदेतनास्यनावोचेनचकीर्त्तयिधिष्ठितिवाएतस्यमह
तोभूतस्यनाममभवतियोस्यैतदेवन्नामवेदब्रह्मभवतिब्रह्मभवति ॥३६॥ इत्यैतरेयकोपनिषत्कृएको
नविंशतितमोध्यायः ॥ पंचारण्यकानिसमाप्तानि ॥ ॥[illegible]कक्षाख्योपनिषत्पुस्तंशाके १५८० वैशा
लिवाहने ॥ दिवाकरेणलेख्याश्रुतथादुर्मुखवत्सरे ॥१॥ द्वषशुक्लद्वितीयायांचित्रायांबुधवासरे ॥ ऐंद्राभिधाने
सुयोगेकौलवेकरणेशुभे ॥२॥ श्रीर्जयतु ॥ ॥छ॥ ॥छ॥

3/17

इत्यैतरेयोपनिषत्संपूर्णा

१८०

Esaitareyopanishad-
sampurnma

80